नं० ८२०-घ

भ्रमराष्टकम्



नं० ८२०-घ

पत्रम १(एकम) १ पत्र

भ्रमराष्टकं गंधाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात। अंधीभूतः कुसुमरजसा कंटकै
श्छिन्नपक्षः स्थातुं गंतुं द्वयमपि सखे नैव शक्तो द्विरेफः १ गंधाढ्यां नवमल्लि
कां मधुकरस्त्यक्त्वा गतो यूथिकां दैवात्तां च विहाय चम्पकवनं पश्चात्सरोजं गतः।
बद्धस्तत्र निशाकरेण विधिना क्रंदत्यसौ मूढधीः संतोषेण विना पराभवपदं
प्राप्नोति मूढो जनः २ येः मीनैर्मकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदा स्ते
भ्राम्यंति फलार्द्धवद्विहितिरतो दृष्ट्वा न संभाषसे। ये कीटास्तव दुष्ट कष्टमथ च नगता
स्तैस्त्वत्फलाभ्यन्तरे धिक्त्वां चूत यतः परापरपरिज्ञानानभिज्ञो भवान् ॥३॥
नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया मालत्याः कुसुमेषु येन सततं केली

भ्रम॰ क्रान्ता हेलया। नेनेयं मधुगं भल्लब्ध मनसा गुञ्जालतां सेवते हा धिग्दैववक्रान्त
राष्ट॰ स एव मधुपः काक्षां दृशां नागतः ॥४॥ पलाशकुसुमभ्रान्त्या शुकतुण्डे मधुव्रतः।
२८ पतत्येष शुकोऽप्येनं जम्बुभ्रान्त्या जिघांसति ॥५॥ दृष्ट्वा स्फीतो भवदलिरसौ लेख
पद्मे विशाले चित्रं चित्रं किमिति किमिति व्याहरन् निष्पपात। नास्मिन् गंधो
न च मधुकणा नास्ति तत्त्वोकुमार्यं घूर्णन्मूर्द्धा वत नतशिरा व्रीडया निर्जगाम ॥६॥
अलिरसौ नलिनीवनवल्लभः कुमुदिनीकुलकेलिकलारसः। विधिवशेन विदे
शमुपागतः कुटजपुष्परसं बहु मन्यते ॥७॥ रात्रिर्गमिष्यति भविष्यति
सुप्रभातं भास्वानुदेष्यति हसिष्यति पद्मजालं। इत्थं विचिंतयति कोषगते
द्विरेफे हा हन्त हन्त नलिनीं गजउज्जहार ॥८॥ इति भ्रमराष्टकं
समाप्तं ॥